# Shri Sarasvati Stotram

# શ્રીસરસ્વતિસ્તોત્રમ્

## Document Information

Text title : Shri Sarasvati Stotram

File name : sarasvatistotramshrIdharasvAmi.itx

Category : devii, shrIdharasvAmI, sarasvatI, stotra, ShoDasha

Location : doc_devii

Author : Shridharaswami

Proofread by : Manish Gavkar

Description/comments : shrIdharasvAmI stotraratnamAlikA

Latest update : February 11, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 12, 2023

*sanskritdocuments.org*

Shri Sarasvati Stotram

# શ્રીસરસ્વતિસ્તોત્રમ્

(શિખરિણીવૃત્તમ્)

લસે દેવિ! સ્તોતું તવ વિવિધવૈચિત્ર્યસુકૃતિં
પરં ત્વેષા બુદ્ધિસ્તવ વિમલશક્ત્યા ન કલિતા ।
સુવાગ્ધીધાત્રી! ત્વદ્ઘટિતસુકૃપાપાઙ્ગનિરતા
યદિ સ્યાદ્ધે માતઃ! સ્તુતિરિતિ તદાનીં ઘટયતિ ॥ ૧॥

મતિર્મે વાણી વા ભગવતિ! તવાંશૌ સુવિમલે!
મહાબ્ધિસ્તારઙ્ગૈઃ સ્ફુટમસિ તથા ત્વગ્ચ સકલૈઃ ।
ભવત્પ્રજ્ઞૈકત્વં સ્ફુટતરવિકાસ વિતનુતે
યદા બુદ્ધૌ દેવિ! સ્તુતિરિતિ તદાનીં ઘટયતિ ॥ ૨॥

અવિદ્યાયાઃ કાર્યં કલુષયતિ મદ્બુદ્ધિમભયે!
ન તસ્યાં હે દેવિ! સ્ફુટતરવિભાનં તવ ખલુ ।
અપાકૃત્ય ત્વં હે જનનિ! યદિ તાં ભાસિ વિમલા
યદા નૈવાજ્ઞાનં સ્તુતિરિતિ તદાનીં ઘટયતિ ॥ ૩॥

અવિદ્યાયા ચૈવં મમ તનુરિયં વા તનુરહં
અનેકાકારૈર્વા જગદિદમહો મોહયતિ મામ્ ।
મનઃકાલુષ્યં હે જનનિ! ન ચ શક્યં કથયિતું
યદા શુદ્ધો બુદ્ધઃ સ્તુતિરિતિ તદાનીં ઘટયતિ ॥ ૪॥

ભયં ચિન્તા દુઃખં મમ મતિમતિર્ભ્રામયતિ યત્
દ્રુતં ત્વં પ્રીત્યા હે જનનિ! તવ દિવ્યામૃતકરૈઃ ।
નિજં મામાલિઙ્ગ્ય ત્વયિ સુખનિધૌ સ્થાપયસિ ચે-
દહં સ્વાન્તઃ શાન્તઃ સ્તુતિરિતિ તદાનીં ઘટયતિ ॥ ૫॥

અયિ! ત્વદ્વાણ્યા માં ભગવતિ! દયાપૂર્ણનયને!
કિલ ત્વં બ્રહ્માસિ ત્વયિ કિમપિ નો ભેદભરિતમ્ ।
યદૈવં હે દેવિ! હ્યુપદિશસિ મામર્ભકધિયા

યદાહં મુક્તઃ સ્યાં સ્તુતિરિતિ તદાનીં ઘટયતિ ॥ ૬॥

ભવાદુદ્ધર્ત્રીં ત્વાં શરણમહમેવં ગત ઇતો
ભવાબ્ધેઃ પારં માં યદિ નયસિ વાત્સલ્યભરિતે! ।
કૃતં યુક્તં મન્યે તદિહ ખલુ ચિહ્નં તવ શુભે! (તવ શિવે!)
યદા ત્વત્ત્રાતોઽહં સ્તુતિરિતિ તદાનીં ઘટયતિ ॥ ૭॥

જનન્યાં પ્રીતિર્યા ભવતિ કિલ બાલસ્ય તુ યથા
ન જાનાસિ ત્વં હે જનનિ! તવ માતા નહિ યતઃ ।
અહો ક્રોશન્તં માં પ્રિયનિજતનૂજં ન વહસે
યદા શાન્તો માતઃ! સ્તુતિરિતિ તદાનીં ઘટયતિ ॥ ૮॥

પૃથિવ્યાં યા માતા વસતિ શિશુભિર્યા પરિવૃતા
રુષા પશ્યન્ત્યેનાન્ રુદત ઇતિ સા નૈતિ વહતિ ।
તથા ત્વં નૈવાસિ! હ્યમિતકરુણાપાઙ્ગનિભૃતા
યદા જાને માતઃ! સ્તુતિરિતિ તદાનીં ઘટયતિ ॥ ૯॥

મદુક્તૈર્દુર્વાક્યૈરપિ તુ ઘનદોષૈર્મુનિનુતે
પ્રમાદાત્ત્વં ક્રુદ્ધા યદિ ન દયયા લાલયસિ મામ્ ।
અહં બાલસ્તાવન્મદનુસરણં ન ત્વયિ તથા
યદા જ્ઞાસ્યે માતઃ! સ્તુતિરિતિ તદાનીં ઘટયતિ ॥ ૧૦॥

સમાધાતું માં ત્વં યદિ ન ચ વિજાનાસિ શુભદે!
બ્રુવેઽહં ત્વાં માતઃ! શ્રવણસુલભોપાયમુચિતમ્ ।
ગૃહીત્વા ત્વદ્વીણાં હ્યતિમધુરકણ્ઠેન સદયે
સમાધેહ્યન્તર્માં સ્તુતિરિતિ તદાનીં ઘટયતિ ॥ ૧૧॥

જગન્માતઃ સ્તોતું ભવતિ કિલ કો વા મતિયુતઃ (ભવતિ ખલુ)
કૃપાપાઙ્ગો ન સ્યાદ્યદિ મયિ તતસ્ત્વં કુરુ કૃપામ્ ।
અહં યાચે માતર્મદભિલષિતા પૂરિતધિયા
યદા સર્વજ્ઞોઽસ્મિ સ્તુતિરિતિ તદાનીં ઘટયતિ ॥ ૧૨॥

જગત્સત્યં નો વા ભવતિ ન ચ કો વાઽસ્ય વિષયઃ
ઇમૌ કૌ જીવેશૌ જગદિદમનીશં કિલ ન વા ।
ઇયં માયા કસ્માત્પ્રભવતિ ચ ભિન્નોત ન ચ વા
ન જાને હે માતઃ! સ્તુતિરિતિ તદાનીં ઘટયતિ ॥ ૧૩॥ (ન જાને માં શાધિ)

મુમુક્ષૂણાં મુક્ત્યૈ ત્વમિહ ખલુ નાન્યોઽસ્ત્યઘહરે!
    પ્રસિદ્ધં તદ્યસ્માજ્જનનિ! વદ કં યામિ શરણમ્ ।
અસૌ કોઽપિ બ્રહ્મા હરિરપિ શિવાદ્યાઃ સુરગણાઃ
    નિજબ્રહ્મૈક્યાર્થં જનનિ! તવ ભક્તિં વિદધતે ॥ ૧૪॥

(શાર્દૂલવિક્રીડિતવૃત્તમ્)
અજ્ઞાનાં પ્રતિભાસિ હે શ્રુતિનુતે! માયેતિ મોહપ્રદા
    સુજ્ઞાનાં પ્રતિભાસિ સુષ્ટુ ચરતાં બ્રહ્મેતિ મોક્ષપ્રદા ।
બ્રહ્મૈકં તવ દિવ્યરૂપમમલં સ્વાનન્દમાત્રં શિવં
    મન્યે નિત્યમપારસંસૃતિભયાત્પરં નયસ્વાધુના ॥ ૧૫॥

(માલિનીવૃત્તમ્)
જયતુ જયતુ નિત્યં શારદા વેદમાતા
    જયતુ જયતુ દેવી જ્ઞાનદા મોક્ષદા ચ ।
જયતુ જયતુ યા શ્રીસ્સર્વદેવૈરુપાસ્યા
    જયતુ જયતુ નિત્યં ભારતી ચિત્સ્વરૂપા ॥ ૧૬॥

ય ઇદં પઠતિ સ્તોત્રં નિત્યં ભક્ત્યાનુપાવનમ્ ।
સરસ્વતીપ્રસાદેન વિદ્યાવાન્ સમ્ભવેદ્ધ્રુવમ્ ॥

ઇતિ શ્રીસમર્થરામદાસાનુગૃહિતરામપદકઞ્જભૃઙ્ગાયમાન
શ્રીમત્પરમહંસપરિવ્રાજકાચાર્ય સદ્ગુરુ ભગવાન્
શ્રીધરસ્વામિના વિરચિતં શ્રીસરસ્વતીસ્તોત્રં સમ્પૂર્ણમ્ ।
શારદા નવરાત્રી - રચનાસ્થાનં - સિરસિ સંવત્સરઃ - ૧૯૪૨

Proofread by Manish Gavkar

*Shri Sarasvati Stotram*

pdf was typeset on February 12, 2023

Please send corrections to *sanskrit@cheerful.com*